तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वम् इत्येवमादिषु युष्मदस्मदादेशा न भवन्ति । पूजायामनन्तरप्रतिषेधः प्रयोजनम् । यावद् देवदत्त पचसि इत्यत्रापि पूजायां नानन्तरम् (८.१.३७/३९४४) [1]इत्येव प्रतिषेधो भवति । 'जात्वपूर्वम्' (८.१.४७/३९५४) इत्येतत्, देवदत्त जातु पचसि [2]इत्यत्रापि भवति । 'आहो उताहो चानन्तरम्' (८.१.४९/३९५६) इति, आहो देवदत्त पचसि, उताहो देवदत्त पचसि इत्यत्रापि भवति । 'आम एकान्तरमामन्त्रितमनन्तिके' (८.१.५५/३९६२) इति, आम् [3]भो पचसि देवदत्त इत्यत्रापि भवति । [4]आमन्त्रितम् इति किम् ? देवदत्तः पचति ।

पूर्वम् इति किम् ? देवदत्त इत्येतस्य आमन्त्रिताद्युदात्तत्वे कर्तव्ये नाविद्यमानवद् भवति । पूर्वत्वं च परापेक्षं भवति इति परस्यैव कार्ये[5] स्वनिमित्तेऽन्यनिमित्ते वा तदविद्यमानवद् भवति, न [6]तु स्वकार्ये । देवदत्त पचसि इत्यत्रापि हि आमन्त्रिताद्युदात्तत्वं भवत्येव । इह 'इमं मे गङ्गे यमुने सरस्वति' (ऋ. १०.७५.५) इति गङ्गेशब्दः पूर्वमामन्त्रितम्, ततः परस्य यमुनेशब्दस्य अनुदात्तत्वे कर्तव्ये स्वयमविद्यमानवत्त्वान् निमित्तं [7]न भवति । मेशब्दस्य निमित्तभावं न प्रतिबध्नाति ॥

## नामन्त्रिते समानाधिकरणे सामान्यवचनम् । (७३/४१३)

[8]अविद्यमानवत्त्वस्य प्रतिषेधः । आमन्त्रितान्ते समानाधिकरणे परतः पूर्वम् आमन्त्रितान्तं सामान्यवचनं न अविद्यमानवद् भवति । किं तर्हि ? विद्यमानवदेव । 'अग्ने गृहपते' (तै. २.४.५.२)। माणवक जटिलकाध्यापक । पूर्वस्य [9]विद्यमानवत्त्वात् परमनुदात्तमेव भवति । आमन्त्रिते इति किम् । देवदत्त पचसि । समानाधिकरणे इति किम् ? देवदत्त पण्डित यज्ञदत्त । अत्र [10]यज्ञदत्तविशेषणं पण्डितशब्दः, न पूर्वेण समानाधिकरणः । सामान्यवचनम् इति किम् ? पर्यायेषु मा भूत्, [11]अघ्न्ये, देवि, सरस्वति, [12]ईडे, काव्ये, विहव्ये । पर्यायशब्दा एते । एवं हि उक्तम्, 'एता ते अघ्न्ये नामानि' (वा. सं. ८.४३) इति ॥

## विभाषितं विशेषवचने बहुवचनम् । (७४/३७८८)

पूर्वेण अविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते । विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमा[13]मन्त्रितं बहुवचनान्तं [14]विभाषितमविद्यमानवद् भवति । देवाः शरण्याः, देवाः शरण्याः । ब्राह्मणा वैयाकरणाः, ब्राह्मणाः वैयाकरणाः । [15]सामान्यवचनाधिकारदेव विशेषवचने इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थम् । बहुवचनम् इति किम् ? माणवक जटिलक[16] । नित्यमेतदविद्यमानवदेव[17] ॥

इति वामनकाशिकायां वृत्तौ अष्टमस्य
अध्यायस्य प्रथमः पादः ॥

---

1, इत्येष ब. 2. तत्रापि ब. 3. भो नास्ति क. 4. आमन्त्रिते क. 5. कर्तव्ये इत्यधिकम् ब. क. इ. ह. 6. हि अकार्ये ब. 7. न नास्ति ब. 8. वाक्यमिदं नास्ति ब. इ. क. 9. विद्यमानत्वात् ब. 10. यज्ञदत्त नास्ति ब, वाक्यमिदं नास्ति ह. 11. हे इत्यधिकम् ब, इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति (वा. सं. 8.43). 12. इडे ब, इडे काम्ये इ. क. ड, ईडचे काम्ये ह. 13. आमन्त्रितानाम् क. इ. 14. पूर्वं इत्यधिकम् क. इ. 15. सामान्यवचनादेव इ. 16. अध्यापक इत्यधिकम् ब. क. इ. ड. 17. भवति इत्यधिकम् ड.